दिनाङ्क :- 29.06.2025 प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>प्रधानमन्त्री नरेन्द्रमोदी-मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य sanskrit news प्रात: एकादशवादने आकाशवाण्यां **मन की बात** इति मासिके कार्यक्रमे देशिकै: वैदेशिकै: जनैश्च साकं स्वविचारान् विनिमयीकरिष्यति। एतस्य मासिक कार्यक्रमस्य एतत् त्रयोविशंत्युत्तर-शततमं प्रसारणं स्यात्। एतस्य कार्यक्रमस्य प्रसारणं आकाशवाण्यां, दूरदर्शने, news on air इति फलके च स्यात्। एतत् सूचनाप्रसारणमन्त्रालयस्य यूट्युबव ाहिनीभिश्चापि प्रसारयिष्यते। कार्यक्रमस्य एतस्य आकाशवाण्यां हिन्दी-प्रसारणानन्तरं क्षेत्रीय-भाषासु चापि प्रसारणं करिष्यते।

<u>शुभांशु शुक्ला-नरेन्द्रमोदी</u>

प्रधानमन्त्री नरेन्द्रमोदिना अन्तारािष्ट्रय-अन्तरिक्ष स्थानके उपस्थितेन शुभांशु शुक्ला-इत्यमुना साकं वार्ता कृता। श्री मोदी प्रोक्तवान् यत् शुभांशो: एषा यात्रा नवयुगस्य प्रारम्भो वर्तते। प्रधानमन्त्रिणा मोदिना सह स्वविचारान् विनिमयीकुर्वन् शुभांशु: शुक्ला प्रतिपादितवान् यत् तेन स्वीय प्रशिक्षणा वधौ एतत् शिक्षितम्, अथ स: प्रोक्तवान् यत् एषा यात्रा सम्पूर्णदेशाय सामूहिकी उपलब्धि: वर्तते। शुभांशु: ज्ञापितवान् यत् अन्तरिक्षात् भारतं भव्यं वृहत्तमं च दरीदृश्यते। अवधेयं यत् कैप्टन-शुक्ला द्वितीय भारतीय: अन्तरिक्षयात्री येन अन्तरिक्ष यात्रा कृता। एतत्पूर्वं चतु:दशाब्द्या: पूर्वं राकेश शर्मा सोवियत मिशन इत्यन्तर्गतं अन्तरिक्षयात्रां कृतवान्।

## बाल मृत्यु परिमाप:

भारते पञ्चवर्षात् न्यून-आयु-वर्गीय-बालानां मृत्यु प्रतिशान्मिते अष्ट सप्तति प्रतिशन्मिता न्यूनता समधिगता, यच्च वैश्विक-स्तरे एकषष्टि प्रतिशन्मितात् अधिकम्। समूहस्य बाल मृत्युमितानुसारेण नवजात-मृत्यु-प्रतशन्मिते अपि वैश्विक स्तरे चतु:पञ्चाशन्मितं तुल्ये सप्तति प्रतिशन्मितस्य न्यूनता समधिगता।

## बिहार उप-निर्वाचनं

बिहार प्रदेशे षट् नगर-पंचायतेषु अथ षट्त्रिंशत्-नगर-निकायेषु उपनिर्वाचनं श ान्तिपूर्णरीत्या सम्पन्नम्। राज्य निर्वाचनायोगानुसारेण द्विषष्टि प्रतिशन्मितं मतदानमत्र समंकित्।

## अमरीका-ईरान

ईरानदेशस्य सर्वोच्च-नेतु: अयातुल्ला अली खामेनेई इत्येतस्य इजरायल-देशेन सह युद्धे विजयप्राप्तपरं वक्तव्यम् अभिलक्ष्य अमेरिका देशीय: राष्ट्रपति: डोनाल्ड ट्रम्प् इत्यसौ अमुं कट्वालोचितवान्। ट्रम्प इत्यसौ संचेतितवान् यत् ईरानदेशेन परमाणु-अस्त्र-निर्माणस्य प्रयास: यदि कृत:यत् अमेरिकादेशेन निश्चितरूपेण ईरानदेशं विरूद्ध आक्रमणं करिष्यते।

## उपराष्ट्रपति:

उपराष्ट्रपति:जगदीप-धनखड प्रोक्तवान् यत् कस्यापि संविधानस्य प्रस्तावना तस्य आत्मा भवति,अथ परिवर्तयितुं न शक्यते कदापि। श्री धनखड: प्रोक्तवान् यत् भारतम् अतिरिच्य न केनापि देशेन स्वीय-संविधान-प्रस्तावनायां परिवर्तनं कृतम्। नवदेहल्यां एकस्मिन् पुस्तक विमोचन-समारोहं सम्बोधयता श्री धनखडेन एते विचारा: प्रस्तुता:।

## महिला क्रिकेट

महिलानां क्रिकेट् स्पर्धायाम्, भारतेन पञ्चस्पर्धा मालिकाया: प्रथमे द्वन्द्वे इंग्लैण्डदलं सप्तनवति-धावनांकै: पराजितम्। स्मृति मन्धाना: स्पर्धायां स्पर्धा- नायिकात्वेन चिता।